Roll No……………………….
Signature of Invigilator ………

Paper Code

MV-105

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination March-2021

### एम. ए. व्याकरण, प्रथमसत्रम्
### व्याकरणम्, पञ्चम्पत्रम्
### संस्कृतसाहित्यम्

समयः – होरात्रयम्    पूर्णाङ्काः 70

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड –क)

प्र01. पृष्टेषु त्रिषु द्वयोः श्लोकयोः पूर्तिः करणीया। (5 x2 =10)

(1) अनादित्वान् …………………………………………………………

(2) ………………………………………………… श्रुतिपरायणः॥

(3) इन्द्रियार्थेषु …………………………………………………………

प्र02. पृष्टेषु त्रिष् द्वयोरेव पदच्छेदविभक्तिसमासा अर्थाश्च लेखनीयाः। (2 x5 =10)

(1) सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥

(2) कार्यकरणकर्तृत्वे हेतुः प्रकृतिरूच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥

(3) क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥

## (खण्ड –ख)

प्र01. पृष्टेषु त्रिषु द्वयोः गद्ययोः सप्रसङ्गविस्तरं व्याख्या करणीया (5 x2 =10)

(1) सा होवाच मैत्रेय्यत्रैव मा भगवन् मोहान्तमापीपिपन्न वा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्ति धर्मा।

(2) स यथाऽदैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि।

( 3 ) आत्मा वा अरे द्रष्टव्यःश्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्व विदितम्। ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेदक्षत्रं तं परादाद्योऽन्यत्रक्षत्रं वेद।

प्र02. पृष्टेषु त्रिषु द्वयोः विषयात्मकप्रश्नयोः समाधानं कुरु। **( 5 x2 =10)**

( 1 ) यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् स्यां न्वहं तेनामृता इत्यस्याशयं स्पष्टी कुरुत।

( 2 ) स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मा इत्यस्याशयः स्पष्टी करणीयः।

( 3 ) स एषनेति नेत्यात्मागृह्यः इत्यस्य विशदं व्याख्यानं कुरुत।

## ( खण्ड -ग)

प्र01. पृष्टेषु पञ्चषु त्रयाणां समाधानं कुरु। **( 5 x3 =15)**

( 1 ) काव्यस्य प्रयोजनं किमिति सश्लोकं लिखन्तु।

( 2 ) 'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्य तु मध्यमम्' इति वाक्यं सोदाहरणं स्पष्टं कुर्वन्तु।

( 3 ) 'वाक्यं रसात्मकं काव्यम्' इति केनोक्तं कश्चास्याभिप्रायः।

( 4 ) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनःक्वापि इत्यस्याशयः स्पष्टः करणीयः।

( 5 ) भामहेन प्रतिपादितं काव्यप्रयोजनं लिखन्तु।

## ( खण्ड -घ)

प्र01. पृष्टयोः द्वयोः एकस्य समाधानं कुरु। **( 5 x1 =5)**

( 1 ) गौतमबुद्धस्य आश्रमस्य विशेषतां संक्षेपेण वणयन्तु।

( 2 ) अश्वघोषस्य जीवनविषये वर्णनं कुर्वन्तु।

प्र02. पृष्टेषु चतुर्षु श्लोकेषु द्वयोः श्लोकयोः छन्दोऽलङ्कारान्वय-व्याकरणादिटिप्पणीनिर्देशपुरस्सरं व्याख्या करणीया। **( 5 x2=10)**

( 1 ) अशिश्रियद्यः सततं दीप्तं काश्यपवत्तपः।
अशिश्राय च तदवृद्धौ सिद्धिं काश्यपवत्पराम॥

( 2 ) तेषां मुनिरुपाध्यायो गौतमः कपिलोऽभवत्।
गुरुगोत्रादतः कौत्सास्ते भवन्तिस्म गौतमाः॥

( 3 ) निरपेक्षाः शरीरेषु धर्मे यत्र स्वबुद्धयः।
संहृष्टा इव यत्नेन तापसास्तेपिरे तपः॥

( 4 ) कपिलस्य च तस्यर्षेस्तस्मिन्नाश्रमवास्तुनि।
यस्मात्ते तत्पुरं चक्रुस्तस्मात् कपिलवास्तु तत्॥